# वैयाकरणसिद्धान्तकौमुदी

## स्वादिसन्धिप्रकरणम् (२)

२९.११.२०१०

# पुनरावर्तनम्

- ससजुषो रुः
- अतो रोरप्लुतादप्लुते
- हशि च
- भोभगोअघोअपूर्वस्य योऽशि

- भोस्, भगोस्, अघोस् इति सकारान्ता निपाताः ।
- भोस् अच्युत
- भोर् अच्युत (ससजुषो रुः)
- भोय् अच्युत (भोभगोअघोअपूर्वस्य योऽशि)
- तेषां रोः यत्वे कृते

# १६८. व्योर्लघुप्रयत्नतरः शाकटायनस्य (८.३.१८)

- पदत्रयम् । व्योः, लघुप्रयत्नतरः, शाकटायनस्य ।
- पदान्तयोः वकार-यकारयोः लघूच्चारणौ वयौ वा स्तः अशि परे ।
- यस्य उच्चारणे जिह्वाग्र-उपाग्र-मध्य-मूलानां शैथिल्यं जायते स लघूच्चारणः।

# १६९. ओतो गार्ग्यस्य (८.३.२०)

- पदद्वयम् । ओतः, गार्ग्यस्य ।
- 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (८.३.१८) इत्यतः 'व्योः' इति, 'लोपः शाकल्यस्य' (८.३.१९) इत्यतः 'लोपः' इति च अनुवर्तते । 'पदस्य' (८.१.१६) इत्यधिक्रियते ।
- ओकारात् परस्य पदान्तस्य अलघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात् ।
- गार्ग्यग्रहणं पूजार्थम् ।
- भो अच्युत ।
- लघुप्रयत्नपक्षे भोयच्युत ।
- पदान्तस्य किम् - तोयम् ।

# १७०. उञि च पदे (८.३.२१)

- पदत्रयम् ।
- ’भोभगोअघोअपूर्वस्य योऽशि’ (८.३.१७) इत्यतः ’अपूर्वस्य’ इति, ’व्योर्लघुप्रयत्नतरः शाकटायनस्य’ (८.३.१८) इत्यतः ’व्योः’ इति, ’लोपः शाकल्यस्य’ (८.३.१९) इत्यतः ’लोपः’ इति च अनुवर्तते । ’पदस्य’ (८.१.१६) इत्यधिक्रियते ।
- अवर्णपूर्वयोः पदान्तयोः यवयोः लोपः उञि परे ।
- सस् + उ एकाग्निः
- सर् + उ एकाग्निः (ससजुषो रुः)
- सय् + उ एकाग्निः (भोभगोअघोअपूर्वस्य योऽशि)
- स उ एकाग्निः (उञि च पदे)

- पदे किम्?
- तन्त्रयुतम्
- तन्त्रे + उतम्
- वेञ् धातोः क्तप्रत्यये सम्प्रसारणे रूपम् ।
- यदि तु प्रतिपदोक्तः निपातः उञिति ग्रहीष्यते, तर्हि उत्तरार्थं पदग्रहणम् ।

# १७१. हलि सर्वेषाम् (८.३.२२)

- पदद्वयम् ।
- 'भोभगोअघोअपूर्वस्य योऽशि' (८.३.१७) इति, 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (८.३.१८) इत्यतः 'व्योः' इति, 'लोपः शाकल्यस्य' (८.३.१९) इत्यतः 'लोपः' इति च अनुवर्तते । 'पदस्य' (८.१.१६) इत्यधिक्रियते ।
- भो-भगो-अघो-अपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद् हलि सर्वेषां मतेन ।
- भोस् + देवाः
- भोर् + देवाः (ससजुषो रुः)
- भोय् + देवाः (भोभगोअघोअपूर्वस्य योऽशि)
- भो देवाः (हलि सर्वेषाम् )

- भो लक्ष्मि
- भो विद्वद्वृन्द
- भगो नमस्ते
- अघो याहि
- देवा नम्याः
- देवा यान्ति
- हलि किम्?
- देवायिह / देवा इह (लोपः शाकल्यस्य)

# १७२. रोऽसुपि (८.२.६९)

- पदद्वयम् । रः, असुपि ।
- 'अहन्' (८.२.६८) इति अनुवर्तते ।
- अह्नः रेफादेशः स्यात् न तु सुपि ।
- रोरपवादः ।
- 'अहन्' इति पूर्वसूत्रेण अहन्-शब्दस्य रुत्वं विधीयते । तस्य अयमपवादः ।
- अहन् + अहः = अहरहः
- अहन् + गणः = अहर्गणः

- यदि रुत्वं स्यात्, तर्हि अहरहः इत्यत्र 'अतो रोरप्लुतादप्लुते' इति उत्वे, गुणे पूर्वरूपे 'अहोऽहः' इति रूपं स्यात् । अहर्गणः इत्यत्रापि 'हशि च' इति उत्वे गुणे 'अहोगणः' इति स्यात् ।
- 'असुपि' किम्?
- अहोभ्याम् ।
- अहन् भ्याम्
- अह रुँ भ्याम् ('अहन्' इति रुत्वम् )
- अह र् भ्याम् ('उपदेशेऽजनुनासिक इत्' , 'तस्य लोपः' )
- अह उ भ्याम् ('हशि च' इति उत्वम्)
- अहोभ्याम् ('आद्गुणः')

# रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा)

- अहन्-शब्दस्य एतेषु परेषु 'रोऽसुपि' इति रेफादेशं बाधित्वा रुत्वं स्यात् ।
- अहन् + रूपम्
- अह र् (रुँ) रूपम् (रूप-रात्रि-रथन्तरेषु रुत्वं वाच्यम्)
- अह उ रूपम् ('हशि च' इति उत्वम्)
- अहोरूपम् ('आद्गुणः')
- गतमहो रात्रिरेषा

- एकदेशविकृतस्य अनन्यत्वाद् अहोरात्रः ।
- अहश्च रात्रिश्च ।
- अहन् सु रात्रि सु ('चार्थे द्वन्द्वः' इति द्वन्द्वसमासः)
- अहन् सु रात्रि सु अ(च्) ('अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः' – ५.४.८७)
- अहन् रात्रि अ ('सुपो धातुप्रातिपदिकयोः'- २.४.७१ इति सुलोपः)
- अहन् रात्र् अ ('यस्येति च' – ६.४.१४८ – इति इकारलोपः)
- अहर् रात्र ('रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्')
- अह उ रात्र ('हशि च' इत्युत्वम्)
- अहोरात्र ('आद्गुणः')
- अहोरथन्तरम् ।

# अहरादीनां पत्यादिषु वा रेफः (वा)

- विसर्गापवादः ।
- अहर्पतिः । गीर्पतिः । धूर्पतिः ।
- पक्षे विसर्गोपध्मानीयौ ।

# १७३. रो रि (८.३.१४)

- पदद्वयम् । रः, रि ।
- 'ढो ढे लोपः' (८.३.१३) इत्यतः 'लोपः' इति अनुवर्तते ।
- रः – षष्ठी = रेफस्य स्थाने
- रि – सप्तमी = रेफे परे
- लोपः – प्रथमा = विधेयः = लोपः स्यात्
- रेफस्य रेफे परे लोपः स्यात् ।
- पुनर् + रमते = पुन रमते ।

# १७४. ढ्रलोपे पूर्वस्य दीर्घोऽणः (६.३.१११)

- ढरेफौ लोपयतीति तथा, तस्मिन् वर्णे अर्थात् ढकारे रेफात्मके परे पूर्वस्य अणः दीर्घः स्यात् ।
- पुना रमते ।
- हरिर् + रम्यः = हरि रम्यः = हरी रम्यः ।
- शम्भुर् + राजते = शम्भु राजते = शम्भू राजते ।